मभिसमाहृतानि त्रिभंगाम् त्रयाणां लोकानां समाहारस्त्रिलोकी अनेक

वद्भावीद्विगुर्यथा चतस्रोदिशः चतुर्दिशः त्रयोलोकास्त्रिलोकाः द्वंद्वश्च

तुर्विधः समुच्चयः अन्वाचयः समाहारः इतरेतरयोगश्चेति तत्र समुच्चया

न्वाचययोः समासो नास्ति समुच्चयो यथा देवदत्तः पचति यज्ञदत्तश्च अन्वा

चयो यथा वटो भिक्षामट गां चानय समाहार द्वंद्वो यथा शंखश्च पटहश्च शं

खपटहं इतरेतरयोगो यथा रामश्च लक्ष्मणश्च रामलक्ष्मणौ युधिष्ठि

रश्च भीमश्च अर्जुनश्च युधिष्ठिरभीमार्जुनाः अव्ययीभावो द्विविधः ना

मपूर्वपदोऽव्ययपूर्वपदश्चेति तत्र पूर्वपदो यथा अस्तपत्रकिंचिच्छाके

शाकप्रति अव्ययपूर्वपदो यथा कुंभस्य समीपमुपकुंभम् यथाविधि अ

© Dharmartha Trust J&K. Digitized by eGangotri

धिहरिरित्यादि तेषामिति पुनस्तेषां समासानां षण्णां चातुर्विध्यं स्यात् पूर्वप
दार्थप्रधानः उ[illegible]त्तरपदार्थप्रधानः [illegible] अन्यपदार्थप्रधानश्चेति तत्पुरु
षो द्विप्रधानः पूर्वपदार्थप्रधानः उत्तरपदार्थप्रधानश्चेति तत्र पूर्वपदा
र्थप्रधानो यथा प्राप्तजीविकः उत्तरपदार्थप्रधानो यथा राजपुरुषः कर्मधारयो
द्विप्रधानः पूर्वपदार्थप्रधानः उत्तरपदार्थप्रधानश्चेति तत्र पूर्वो यथा पुरुषर्ष
भः परो यथा नीलोत्पलम् बहुव्रीहिर्द्विविधः उभयपदार्थप्रधानोऽन्यपदार्थ
प्रधानश्च आद्यो यथा द्वित्राः द्वितीयो यथा चित्रगुर्देवदत्तः द्वंद्वः उभयपदार्थ
प्रधानः यथा रामलक्ष्मणौ द्विगुरुत्तरपदार्थप्रधान एव यथा त्रिसंगम् अव्य
यीभावस्त्रिविधः पूर्वपदार्थप्रधानः उत्तरपदार्थप्रधानः अन्यपदार्थप्रधान

© Dharmartha Trust J&K. Digitized by eGangotri

मेधावी स्रग्वी युस् यथा ऊर्णा अस्यास्तीति ऊर्णायुः ग्मिनि यथा वाग् अस्यास्ती
ति वाग्मी आलच् यथा यो बहु संमतं भाषते स वाचालः आटच् यथा यो
बहु संमतं भाषते स वाचाटः इनच् यथा फलान्यस्य फलिनः बर्हिणः आर
२ कन् यथा शृंगमस्यास्तीति शृंगारकः वृंदमस्तीति वृंदारकः आलु -- च
यथा शीतं सहस इति शीतालुः उष्णालुः त्रयालुः चूलो यथा बलं न सह
ते इति बलूनः ऊलो यथा वातानां समूहो वातूलः अण् यथा वशिष्ठस्या
पत्यं पुमान् वाशिष्ठः जनपदोऽस्य निवासः जानपदः व्याकरणमधीते वे
त्ति वा वैयाकरणः क्रमकमधीते वेत्ति वा क्रमकः पदकः खञ् यथा प्रियंगूनां
भवनं क्षेत्रं प्रैयंगवीनम् मौद्गीनम् कौद्रवीणम् अञ् यथा पाञ्चालस्याप

© Dharmartha Trust J&K. Digitized by eGangotri

त्यं पुमान् पांचालः वैदेहः इञ् यथा दशरथस्यापत्यं पुमान् दाशरथिः फ
क् यथा नडायनः आश्वलायनः यञ् यथा गर्गस्यापत्यं पुमान् गार्ग्यः
ढक् यथा गंगाया अपत्यं पुमान् गांगेयः वैनतेयः आञ्जनेयः ऐरक्
यथा चटकाया अपत्यं पुमान् चाटकैरः एरक् यथा गोधाया अपत्यं पुमा
न् गौधेनः आरक् यथा गोधाया अपत्यं पुमान् गौधारः घ यथा क्षत्र
स्यापत्यं पुमान् क्षत्रियः ख यथा कुलस्यापत्यं कुलीनः ण्य यथा कु
र्वपत्यं पुमान् कौरव्यः यञ् यथा मूर्ध्नि भवा मूर्धन्यः उरस्यः दंत्यः इ यथा
था उत्तो गंधो यस्य स उद्गंधिः पूतिगंधिः सुगंधिः इतच् यथा कुसु
मान्यस्य संजातानि कुसुमितो वृक्षः अनञ् यथा पुष्यमेव चनुर्थस्य से

© Dharmartha Trust J&K. Digitized by eGangotri

(ख)

श्चेति तत्र प्रथमो यथा उपकुंभमृद्धितीयो यथा शाकप्रतितृतीयो यथा उन्म
त्तगंगंदेशः इति समासः अथ तद्धितप्रत्ययाः सामान्येति सामान्यवृत्तिः अव्य
यसंज्ञः भाववाचकश्चेति त्रिविधस्तद्धितप्रत्ययः अनेकेषां परस्परसमर्था
नां पदानां प्रथमादेव पदात् प्रसूयते तत्र सामान्यवृत्तिः मतुप् १ त्वच् २ इतच्
३ श ४ न ५ ण ६ उरच् ७ र ८ व ९ वलच् १० इनिः ११ ठन् १२ विनिः १३ युस्
१४ ग्मिनिः १५ अलच् १६ आठच् १७ इनित् १८ आरकन् १९ आलुच्
२० चूलः २१ ऊलः २२ आण २३ वन् २४ खड् २५ अड् २६ इड् २७ फक्
२८ यड् २९ ठक् ३० औरक् ३१ एरक् ३२ आरकः ३३ ढ ३४ ख ३५ एय ३६
यत् ३७ इत् ३८ इतच् ३९ अनड् ४० चंचुप् ४१ चणप् ४२ इष्टन् ४३

© Dharmartha Trust J&K. Digitized by eGangotri

६ इयसन् ४४ तरप् ४५ तमप् ४६ कल्पप् ४७ देश्यः ४८ देशीयर् ४९ जातीयर् ५०
१ द्वयसट् ५१ दघ्नट् ५२ मात्रट् ५३ तयप् ५४ टक् ५५ इत्यादि मतुप् यथा गुणोऽ
स्यास्तीति गुणवान् गुणवती गुणवत् लच् यथा चूडाऽस्यास्तीति चूडालः वत्सं काम
यते वत्सलः अंसलः इलच् यथा फेनोऽस्यास्तीति फेनिलः तुंदिलः शः यथा लो
लामान्यस्य संतीति मशः नः यथा वामोऽस्यास्तीति वामनः णः यथा प्रज्ञाऽस्यास्ती
ति प्राज्ञः श्राद्धः आर्चः वृत्तिरस्यास्तीति वार्त्तः उरच् यथा दंताउन्नताअस्य
संतीति दंतुरः रः यथा मधु अस्यास्तीति मधुरः वः यथा केशा अस्य संतीति केशवः
वलच् यथा रजोऽस्यास्तीति रजस्वलः इनिः यथा धनमस्यास्तीति धनी ठन् य
था धनमस्यास्तीति धनिकः विनिः यथा यशोऽस्यास्तीति यशस्वी मायावी ६

© Dharmartha Trust J&K. Digitized by eGangotri